श्री जयलक्ष्मी मातृ पूजा विधिः

आचम्य । प्राणानायम्य । देशकालौ संकीर्त्य । (संकल्पं) मम उपात्त .. प्रीत्यर्थं मम धर्मार्थ काम मोक्ष चतुर्विध फल पुरुषार्थ सिद्ध्यर्थं, श्री सद्गुरु प्रसाद सिद्ध्यर्थं, तद्द्वारा सकलाभीष्ट सिद्ध्यर्थं, अस्मत्परमगुरु स्वरूप श्री जयलक्ष्मी मातृ पूजां यथाशक्ति करिष्ये ॥

ध्यानंः
ध्यायामि जयलक्ष्मीं त्वां सावित्रीगर्भ संभवां ।
बोम्मेपर्ति समाधिस्थां सच्चिदानंद सेवितां ॥
श्री जयलक्ष्मी मात्रे नमः – ध्यायामि

आवाहनंः
आवाहयामि भक्त्या त्वां भक्त संताप हारिणीं ।
जयलक्ष्मीं जगद्वंद्यां जाड्यदूरां सुमंगळीं ॥
श्री जयलक्ष्मी मात्रे नमः – आवाहयामि

आसनंः
सौवर्णमासनं देवि सर्वालंकार शोभिते ।
उपवेशकृते मातः दास्यामानंद दायिनी ॥
श्री जयलक्ष्मी मात्रे नमः – आसनं समर्पयामि

पाद्यंः
पाद्यं गृहाण वरदे गंधपुष्पाक्षतैर्युतं ।
दिव्यं वारि मया दत्तं जयलक्ष्मी दयान्विते ॥
श्री जयलक्ष्मी मात्रे नमः– पादयोः पाद्यं समर्पयामि

अर्घ्यंः
अष्टगंध समायुक्तं जयलक्ष्मी वरप्रदे ।
अर्घ्यं गृहाण शुभदे सर्व पापहरा भव ॥
श्री जयलक्ष्मी मात्रे नमः – हस्तयोः अर्घ्यं समर्पयामि

आचमनंः
जयलक्ष्मी जगन्मातः भक्ताभीष्ट फलप्रदे ।
ददाम्याचमनं तुभ्यं आंध्रलोक सुपूजिते ॥
श्री जयलक्ष्मी मात्रे नमः – मुखे आचमनीयं समर्पयामि

पंचामृत स्नानंः
क्षीराज्य मधुभिर दध्ना शर्कराभिश्च संयुतं ।
पंचामृतं गृहाणाद्य जयलक्ष्मी सुखप्रदे ॥
श्री जयलक्ष्मी मात्रे नमः – पंचामृत स्नानं समर्पयामि

स्नानं:
पुण्यतीर्थ समानीतं शुद्धोदकमिदं शुभे ।
स्नानार्थं  गृह्यतां देवि जयलक्ष्मि जयप्रदे ॥
श्री जयलक्ष्मी मात्रे नमः – शुद्धोदक स्नानं समर्पयामि
वस्त्रं:
सौवर्ण तंतु संयुक्तं क्षौमवस्त्रं सकंचुकं ।
मया दत्तं गृहाणेदं सच्चिदानंद वंदिते ॥
श्री जयलक्ष्मी मात्रे नमः – वस्त्रयुग्मं समर्पयामि
गंधं:
मलयाचल संभूतं कर्पूर सुमिश्रितं ।
शीतलं बहुलामोदं चंदनं प्रतिगृह्यतां ॥
श्री जयलक्ष्मी मात्रे नमः – गंधं समर्पयामि
श्री जयलक्ष्मी मात्रे नमः – कुंकुमाक्षतान समर्पयामि
आभरणं:
रत्नकंकण केयूर कांची कुंडल नूपुरान ।
मुक्ताहारं किरीटं च गृहाणाभरणानि च ॥
श्री जयलक्ष्मी मात्रे नमः – आभरणानि समर्पयामि
पुष्पं:
मातर्मे रुचिरामोद पूरितां पुष्पमालिकां ।
ग्रथितां पुष्प संघैश्च स्वीकुरुष्व दयानिधे ॥
श्री जयलक्ष्मी मात्रे नमः – पुष्पैः समर्पयामि
अंगपूजा:
श्री जयलक्ष्मी मात्रे नमः – पादतले पूजयामि
अंगुळीयक मंडितायै नमः – पादांगुळी पूजयामि
हरिद्रांचितायै नमः – पादौ पूजयामि
पद्मासनस्थितायै नमः – जंघ जानूरु देशान पूजयामि
सच्चिदानंद जनन्यै नमः – उदरं पूजयामि
जगन्मात्रे नमः –स्तनद्वयं पूजयामि
वराभय प्रदायै नमः – करद्वयं पूजयामि
नादविद्या गुरवे नमः – कंठं पूजयामि
मंजुस्मितायै नमः – दंतान ओष्ठौ च पूजयामि
ताटंकिनी प्रवरायै नमः – कर्णद्वयं पूजयामि
प्राणायाम रतायै नमः – नासिकां पूजयामि

करुणामृत वर्षिण्यै नमः – नेत्रद्वयं पूजयामि
लसन्मंगळ तिलकायै नमः – भ्रूमध्यं पूजयामि
तेजोनिलयायै नमः – फालं पूजयामि
वेद सीमंत वेद्यायै नमः – सीमंतं पूजयामि
ब्रह्मविद्या प्रदायिन्यै नमः – शिरः पूजयामि
गुरुमंडल रूपिण्यै नमः – सर्वाण्यंगानि पूजयामि

श्री जयलक्ष्मी अष्टोत्तर शतनामावळि

ॐ जयलक्ष्म्यै नमः
ॐ जगन्मात्रे नमः
ॐ जयदायै नमः
ॐ जाड्यनाशिन्यै नमः
ॐ जगदानंद जनन्यै नमः
ॐ जलजायत लोचनायै नमः
ॐ अगस्त्यक्षेत्र संभूतायै नमः
ॐ सह्यजार्कतटाश्रयायै नमः
ॐ सावित्रीगर्भ संजातायै नमः
ॐ दिव्य लक्षण लक्षितायै नमः
ॐ लिंगण्णशर्म तनयायै नमः
ॐ माधव्यै नमः
ॐ मधुराकृत्यै नमः
ॐ माता पितृ तपःप्राप्तायै नमः
ॐ कर्णाटकुल भूषणायै नमः
ॐ वैशाख पंचमी जातायै नमः
ॐ मेकेदाटु निजालयायै नमः
ॐ विप्रोत्तम तनूजातायै नमः
ॐ बंधुबांधव कीर्तितायै नमः
ॐ सोदरप्रेम सदनायै नमः
ॐ पितृ शुश्रूषणादृतायै नमः
ॐ कावेरीजल संतुष्टायै नमः
ॐ बाललीला विनोदिन्यै नमः
ॐ नेत्रानंद विधात्र्यै नमः

ॐ विनयालंकृतायै नमः
ॐ शुभायै नमः
ॐ अन्वर्थनाम्न्यै नमः
ॐ विजयायै नमः
ॐ व्रतदीक्षित मानसायै नमः
ॐ कर्णाटक बंधु सुप्रीतायै नमः
ॐ कर्णाटक जन कीर्तिदायै नमः
ॐ मुस्लिं फकीर शुश्रूषासक्तायै नमः
ॐ मान्यायै नमः
ॐ मनस्विन्यै नमः
ॐ आत्रेय ध्यान निरतायै नमः
ॐ आत्रेयालोकनातुरायै नमः
ॐ संगमेशार्चनरतायै नमः
ॐ संगमेश कृपाश्रयायै नमः
ॐ भगवद्ध्यान निरतायै नमः
ॐ बंधुलोक समादृतायै नमः
ॐ स्वप्न संदृष्ट दत्तेशायै नमः
ॐ दत्त भक्तायै नमः
ॐ दयान्वितायै नमः
ॐ सर्व प्रशंसितायै नमः
ॐ सिद्धायै नमः
ॐ साधु सज्जन सेवितायै नमः
ॐ धर्मप्रियायै नमः
ॐ धर्म निष्ठायै नमः
ॐ धर्माधर्म विचारणायै नमः
ॐ नरसिंह प्रियायै नमः
ॐ साध्व्यै नमः
ॐ संसारभरणोद्यतायै नमः
ॐ पतिप्राणायै नमः
ॐ पावनांग्यै नमः
ॐ पतिसेवन तत्परायै नमः
ॐ गृहागत समाराध्यायै नमः
ॐ गृहकर्म सुपंडितायै नमः

ॐ ग्रामीण जन बंधवे नमः
ॐ प्रातिवेशिक साह्यकृते नमः
ॐ आंध्र नीवृदलंकारायै नमः
ॐ आंध्रलोक सुपूजितायै नमः
ॐ सदात्मजात जनन्यै नमः
ॐ जनित्रीकुल भूषणायै नमः
ॐ भस्मभूषित वत्सांबायै नमः
ॐ वत्स संतुष्ट मानसायै नमः
ॐ संतान पालन रतायै नमः
ॐ सत्यनारायण सुप्रसव्यै नमः
ॐ सच्चिदानंद जनन्यै नमः
ॐ बंधुलोक समादृतायै नमः
ॐ पुत्रोपचार निरतायै नमः
ॐ पुत्र सन्मार्ग दर्शितायै नमः
ॐ सत्य निष्ठायै नमः
ॐ सत्यमत्यै नमः
ॐ सत्कार्य व्रत दीक्षितायै नमः
ॐ आत्म निष्ठायै नमः
ॐ आनंद दात्र्यै नमः
ॐ आश्रितावन दीक्षितायै नमः
ॐ भगवद्ध्यान निरतायै नमः
ॐ भगवत्पाद संश्रितायै नमः
ॐ बोम्मेपर्ति समाधिस्थितायै नमः
ॐ भक्त संतोषकारिण्यै नमः
ॐ दारिद्य दमन्यै नमः
ॐ देव्यै नमः
ॐ दुःखसंघ विनाशिन्यै नमः
ॐ दर्शितानेक कुतुकायै नमः
ॐ दुर्वाराघ निवारिण्यै नमः
ॐ भूरिदायै नमः
ॐ भक्ति सुलभायै नमः
ॐ भक्त स्वर्गापवर्गदायै नमः
ॐ अनाथनाथायै नमः

ॐ आनंददायिन्यै नमः
ॐ दुरितापहायै नमः
ॐ पुण्यायै नमः
ॐ पुण्यप्रदायै नमः
ॐ पापसूदन्यै नमः
ॐ प्रणतार्तिघ्न्यै नमः
ॐ सुवासिन्यर्चन प्रीतायै नमः
ॐ सुखदायै नमः
ॐ सुमंगल्यै नमः
ॐ अदृश्यायै नमः
ॐ दर्शनार्हायै नमः
ॐ शरण्यजन संश्रितायै नमः
ॐ अन्नदायै नमः
ॐ अनंत फलदायै नमः
ॐ धर्म कामार्थ मोक्षदायै नमः
ॐ सच्चिदानंद संसेव्यायै नमः
ॐ सच्चिदानंद तोषिण्यै नमः
ॐ सच्चिदानंद जनन्यै नमः
ॐ सदानंद विधायिन्यै नमः
श्री जयलक्ष्मी मात्रे नमः – नानाविध पत्रपुष्प कुंकुमाक्षतान समर्पयामि
धूपंः
दशांगं गुग्गुलं धूपं सुगंधं सुमनोहरं ।
धूपं गृहाण वरदे कर्णाटकुल संभवे ॥
श्री जयलक्ष्मी मात्रे नमः – धूपं समर्पयामि
दीपंः
साज्यं त्रिवर्ति संयुक्तं वह्निना योजितं मया ।
त्रैलोक्य मंगळं दीपं दर्शयामि दयान्विते ॥
श्री जयलक्ष्मी मात्रे नमः – दीपं समर्पयामि
धूप दीपानंतरं शुद्ध आचमनीयं समर्पयामि
नैवेद्यंः
भक्ष्य भोज्यादिकं भक्त्या फल पक्व समन्वितं ।
नैवेद्यं कल्पितं देवि स्वीकुरुष्व दयानिधे ॥
श्री जयलक्ष्मी मात्रे नमः – नैवेद्यं समर्पयामि

मध्ये मध्ये उदकपानीयं समर्पयामि. हस्तौ प्रक्षाळयामि. पादौ प्रक्षाळयामि. आचमनं समर्पयामि

तांबूलं:

पूगीफल समायुक्तं नागवल्ली दळैर्युतं ।
मुक्ताचूर्ण समायुक्तं तांबूलं प्रतिगृह्यतां ॥
श्री जयलक्ष्मी मात्रे नमः – तांबूलं समर्पयामि

नीराजनं:

नीराजनं गृहाणेदं जयलक्ष्मि वरप्रदे ।
कुरु मां कृपया देवि ज्ञानज्योतिः प्रकाशितं ॥
श्री जयलक्ष्मी मात्रे नमः – नीराजनं समर्पयामि

मंत्रपुष्पं:

चंपकैः शतपत्रैश्च कल्हारैः करवीरकैः ।
पाटलैर्वकुलैर्युक्तं गृहाण कुसुमांजलिं ॥
श्री जयलक्ष्मी मात्रे नमः – मंत्रपुष्पं समर्पयामि

प्रदक्षिणं:

प्रदक्षिणं करिष्यामि जयलक्ष्मि नमोस्तुते ।
मम जन्मार्जितं पापं सर्वं नाशय सत्वरं ॥
श्री जयलक्ष्मी मात्रे नमः – प्रदक्षिण नमस्कारान समर्पयामि

प्रार्थनं:

जयलक्ष्मि नमस्तेस्तु जयदे जाड्यनाशिनि ।
नमस्तेस्तु विशालाक्षि दुरितं मे विनाशय ॥
श्री जयलक्ष्मी मात्रे नमः – प्रार्थनां समर्पयामि

फलसमर्पणं:

अनेन यथाशक्ति कृतेन पूजनेन भगवती, सर्वात्मिका,
अस्मत्परमगुरु स्वरूपिणी, श्री जयलक्ष्मी माता
सुप्रीता सुप्रसन्ना वरदा भवतु! एतत्फलं श्री परमेश्वरार्पणमस्तु.